२०९। भर्त्राऽधिकं रहस्युक्तं वक्तुमिच्छन्त्यबुद्धयः।

२१०। अनुरागस्तु फलेन सूच्यते।

२११। अज्ञाफलमैश्वर्यम्।

२१२। दातव्यमपि बालिशः परिक्लेशेन दास्यति।

२१३। महदैश्वर्यं प्राप्याप्यधृतिमान् विनश्यति।

२१४। नास्त्यधृतेरैहिकामुष्मिकम्।

208. Do not punish a man if you can at all forgive him.

209. Only the unwise disclose what their masters confide to them.

210. Attachment is known by its fruit.

211. The wealth of the ignorant is worthless. (The text seems to be corrupt here; it should be अज्ञस्याफलमैश्वर्यम् or आज्ञाफलमैश्वर्यम्)।

212. Even when they must pay, niggards do it with a grudge. (बालिश means a fool.)

213. Even attaining great prosperity a man wanting in steadiness (Dhṛti—steadiness or holding) goes to ruin.

214. The man without self-control has (claims) nothing in this world, nor in that beyond.

२१५। न दुर्जनैः सह संसर्गः कर्त्तव्यः ।

२१६। शौण्डहस्तगतं पयोऽप्यवमन्येत ।

२१७। कार्यसङ्कटेष्वर्थव्यवसायिनी बुद्धिः ।

२१८। मितभोजनं स्वास्थ्यम् ।

२१९। पथ्यमपथ्याजीर्णे नाश्नीयात् ।

१२०। जीर्णभोजिनं व्याधिर्नोपसर्पति ।

२२१। जीर्णशरीरे वर्धमानं व्याधिं नोपेक्षेत ।

215. Never mix with the wicked. Cf. Val. Su. 355.

216. Water from the hands of the brewer is to be rejected. Cf. Hitop—पयोऽपि शौण्डिकीहस्ते वारुणीत्यभिधीयते etc.

217. In a dilemma it is true intelligence which only enables a man to attain his end.

[Practical wisdom succeeds in peril.]

218. A measured [moderate] diet is good for health. C. P. N. 143

219. Take no food however light, in indigestion due to the taking of improper food. C. P. N. 144.

220. He who eats after proper digestion is free from disease. C. P. N. 145.

221. Do not neglect a growing disease, especially when the constitution is weak. C.P.N. 147.

२२२। अजीर्णे भोजनं दुःखम्।

२२३। शत्रोरपि विशिष्यते व्याधिः।

२२४। दानं निधानमनुगामि।

२२५। पटुतरे तृष्णापरे सुलभमतिसन्धानम्।

२२६। तृष्णया मतिश्छाद्यते।

२२७। कार्य्यबहुत्वे बहुफलमायतिकं कुर्य्यात्।

२२८। स्वयमेवावस्कन्नं कार्य्यं निरीक्षेत।

२२९। मूर्खेषु साहसं नियतम्।

222. Eating aggravates indigestion. C.P.N. 146.

223. Diseases are worse than enemies. C. P. N. 148

224. Charity depends upon wealth.

225. An intelligent man, if given to lust or avarice, is easily deceived. (Tṛshṇā means thirst) C. P. N. 150.

226. Desire (too much hankering, lit. thirst) clouds the understanding.

227. Of enterprises that which will pay in the future is to be selected. C. P. N. 151.

228 A man must look to his own business personally [however overwhelming it may be]. C. P. N. 152. reads आसन्न.

229. Recklessness resides in fools.

२३० । मूर्खेषु विवादो न कर्त्तव्यः ।

२३१ । मूर्खेषु मूर्खवत् कथयेत् ।

२३२ । आयसैरायसं छेद्यम् ।

२३३ । नास्त्यधीमतः सखा ।

२३४ । धर्म्मेण धार्य्यते लोकः ।

२३५ । प्रेतमपि धर्म्माधर्म्मावनुगच्छतः ।

२३६ । दया धर्म्मस्य जन्मभूमिः ।

२३७ । धर्म्ममूले सत्यदाने ।

230. One should not quarrel with fools.

231. Play the fool when talking with (dealing with) fools.

232. Iron severs iron.

233. A man lacking in intelligence (a fool) has no [real] friend.

234. The world is sustained by Dharma (virtue.)

235. The fruits of good and evil follow a man even after death.

236. Charity is the source of Dharma (religious merit.) C. P. N. 155.

237. Truth and charity are the roots of Dharma. C. P. N. 154.

२३८ । धर्म्मेण जयति लोकान् ।

२३९ । मृत्युरपि धर्म्मिष्ठं रक्षति ।

२४० । धर्म्माद्विपरीतं पापं यत्र यत्र प्रसज्यते तत्र धर्म्मावमतिर्महती प्रसज्यते ।

२४१ । उपस्थितविनाशानां प्रकृतिराकारेण कार्य्येण लक्ष्यते ।

२४२ । आत्मविनाशं सूचयत्यधर्म्मबुद्धिः ।

२४३ । पिशुनवादिनो न रहस्यम् ।

२४४ । पररहस्यं नैव श्रोतव्यम् ।

२४५ । वल्लभस्य कारकत्वमधर्म्मयुक्तम् ।

238. Righteousness enables men to conquer the whole world. C. P. N. 156.

239. Even death protects the virtuous.

240. When vices, opposed to religion, predominate, the worst downfall is caused.

241. The doomed are known by their nature and action.

242. Evil tendency presages destruction.

243. A slanderer has no secrets.

244. One should not try to pry into others' secrets. C. P. N. 162.

245. There must be bad business (leading

२४६ । स्वजनेष्वतिक्रमो न कर्त्तव्यः ।

२४७ । माताऽपि दुष्टा त्याज्या ।

२४८ । स्वहस्तोऽपि विषदिग्धश्छेद्यः ।

२४९ । परोऽपि च हितो बन्धुः ।

२५० । कक्षादप्यौषधं गृह्यते ।

२५१ । नास्ति चोरेषु विश्वासः ।

२५२ । अप्रतीकारेष्वनादरो न कर्त्तव्यः ।

२५३ । व्यसनं मनागपि बाधते ।

to adharma or deviation from the right path) where favourites are entrusted with powers.

246. Never go against your own kinsmen.

247. Even a mother, if bad, should be forsaken.

248. When poisoned, the hand should be cut off. R. V. I. 28.

249. A well-wisher though he is not a relative is a true friend. C. P. N. 164.

250. [The best] Medicine is furnished even by herbs. C. P. N. 164.

251. No trust is to be placed in thieves.

252. That which cannot be cured should not be neglected.

253. The slightest of Vyasana torments men. (Vyasana means kāmaja and kopaja vices.)

२५४ । अमरवदर्थजातमर्जयेत् ।

२५५ । अर्थवान् सर्वलोकस्य बहुमतः ।

२५६ । महेन्द्रमप्यर्थहीनं न बहुमन्यते लोकः ।

२५७ । दारिद्र्यं खलु पुरुषस्य जीवितं मरणम् ।

२५८ । विरूपोऽर्थवान् सुरूपः ।

२५९ । अदातारमप्यर्थवन्तमर्थिनो न त्यजन्ति ।

२६० । अकुलीनोऽपि कुलीनाद्विशिष्टः ।

254. Strive to gain wealth like an immortal. Cf. अजरामरवत् प्राज्ञो विद्यामर्थं च चिन्तयेत् C. P. N. 163.

255. The wealthy (rich) are adored by all.

256. The king of the gods, if poor, is not worshipped by men. C. P. N. 166.

257. Poverty is but living death. Cf. Mṛcch. I. दारिद्र्यान्मरणाद्वा etc. and निवासश्चिन्तायाः etc. See also Bhartṛ. Nīti. S'a.

258. Wealth hides ugliness. Cf. Nīti S'a. 41

259. A rich man though not disposed to charity (niggardly), is not forsaken by suitors.

260. Riches make an ignoble man appear noble in society. (Riches are the foundations of nobility).

२६१ । नास्त्यपमानभयमनार्यस्य ।

२६२ । न चेतनावतां वृत्तिभयम् ।

२६३ । न जितेन्द्रियाणां विषयभयम् ।

२६४ । न कृतार्थानां मरणभयम् ।

२६५ । कस्यचिदर्थं स्वमिव मन्यते साधुः ।

२६६ । परविभवेष्वादरो न कर्त्तव्यः ।

२६७ । परविभवेष्वादरोऽपि नाशमूलम् ।

261. The base fear no insult. (Anāryya is here used as a term of contempt).

262. The wise never fear for their Vṛitti (livelihood?)

263. Self-controlled men have nothing to fear from the evils arising out of attachment to the world (enjoyment).

264. Men who have fulfilled their task fear not death.

265. The honest regard others' possessions [with as much care] as [they bestow on] their own.

266. Never think much of others' prosperity. C. P. N. 169.

267. Constant attention to others' prosperity leads to ruin.

२६८ । पलालमपि परद्रव्यं न हर्त्तव्यम् ।

२६९ । परद्रव्यापहरणमात्मद्रव्यनाशहेतुः ।

२७० । न चौर्य्यात् परं मृत्युपाशः ।

२७१ । यवागूरपि प्राणधारणं करोति काले ।

२७२ । न मृतस्यौषधं प्रयोजनम् ।

२७३ । समकाले स्वयमपि प्रभुत्वस्य प्रयोजनं भवति ।

२७४ । नीचस्य विद्याः पापकर्म्मणि योजयन्ति ।

२७५ । पयःपानमपि विषवर्द्धनं भुजङ्गस्य नामृतं स्यात् ।

268. Never take any thing belonging to another even to the value of a straw. C. P. N. 170.

269. Stealing of others' articles often leads to one's loss. C. P. N. 171.

270. Theft is the worst noose of death.

271. [In times of distress] Barley gruel saves the life of a man.

272. Medicine is of no benefit to the dead.

273. A man must exercise his mastery in normal times.

274. The learning of the base leads only to roguery.

275. [The drinking of] Milk adds but to the venom of the snake and is not turned into

२७६। न हि धान्यसमो ह्यर्थः।

२७७। न क्षुधासमः शत्रुः।

२७८। अकृते नियता क्षुत्।

२७९। नास्त्यभक्ष्यं क्षुधितस्य।

२८०। इन्द्रियाणि जरावशं कुर्वन्ति।

२८१। सानुक्रोशं भर्त्तारमाजीवेत्।

२८२। लुब्धसेवी पावकेच्छया खद्योतं धमति।

ambrosia. Cf. Hitop. पयःपानं भुजङ्गानां केवलं विषवर्द्धनम् etc.

276. There is indeed no wealth like a stock of grains. C. P. N. 174.

277. Hunger is the worst enemy.

278. The wretched are ever hungry.

279. The hungry make no choice of food.

280. Hunger brings on infirmity of senses.

281. A kind master is to be served. (Sānukros'a means one with compassion).

282. He who serves a greedy, niggardly master, is equally disappointed with a man who wishes to get fire from the glow-worm. C. P. N. 176.

[To serve a greedy master, causes as much disappointment as fanning a glow-worm for fire.]

२८३। विशेषज्ञं स्वामिनमाश्रयेत्।

२८४। पुरुषस्य मैथुनं जरा।

२८५। स्त्रीणाममैथुनं जरा।

२८६। न नीचोत्तमयोर्विवाहः।

२८७। अगम्यागमनादायुर्यशःपुण्यानि क्षीयन्ते।

२८८। नास्त्यहङ्कारसमः शत्रुः।

२८९। संसदि शत्रुं न परिक्रोशेत्।

283. Serve (take the protection of) a master of high accomplishments.

284. Excessive sexual indulgence ruins men.

285. Sexual abstinence ruins women. Cf. Chā. Rā. Ni. VIII—9, Mahā. Ud. XXIX 78-7.

286. The union of the high and low is not desirable. C P. N 177; P.T. II 27.

287. Intercourse with women of prohibited order takes away life, fame and merit. C. P. N. 178.

288. Pride is the worst enemy. C. P N. 179.

289. Assail not your enemy in open assembly.

२९० । शत्रुव्यसनं श्रवणसुखम् ।

२९१ । अधनस्य बुद्धिर्न विद्यते ।

२९२ । हितमप्यधनस्य वाक्यं न गृह्यते ।

२९३ । अधनः स्वभार्ययाऽप्यवमन्यते ।

२९४ । पुष्पहीनं सहकारमपि नोपासते भ्रमराः ।

२९५ । विद्या धनमधनानाम् ।

२९६ । विद्या चौरैरपि न ग्राह्या ।

290. Men delight to hear the tale of their enemy's discomfitures.

291. A poor man lacks intelligence. (To one in poverty his intelligence is of no account.)

292. The poor man's advice though beneficial is hardly listened to.

293. A poor man is despised (not cared for) even by his wife. C. P. N. 167.

294. A flowerless mangoe tree is shunned by bees.

295. Learning (proficiency in science and arts) is the true wealth of the poor. C.P.N. 180.

296. Even thieves cannot steal it away. Cf. Cha. Sl. ज्ञातिभिर्वण्ट्यते नैव चौरेणापि न नीयते etc. C. P. N. 181.

२९७। विद्यया ख्यापिता ख्यातिः।

२९८। यशःशरीरं न विनश्यति।

२९९। यः परार्थमुपसर्पति स सत्पुरुषः।

३००। इन्द्रियाणां प्रशमं शास्त्रम्।

३०१। अशास्त्रकार्यवृत्तौ शास्त्राङ्कुशं निवारयति।

३०२। नीचस्य विद्या नोपेतव्या।

३०३। म्लेच्छभाषणं न शिक्षेत।

297. It (learning) establishes fame.

298. A man endowed with true fame is imperishable.

299. The best man is he who looks after the interest of others.

300. The Śāstras teach how to control the senses. (The control of the senses is the quintessence of the Śāstras).

301. [The injunctions of the] Śāstras serve as the goad in restraining men from unrighteous conduct.

302. The art of the mean is not to be accepted.

303. Never learn the language or the speech of the Mlecchas. Cf. passage of Śat. Br. (III. 2. 1. 2) quoted in Mahā-Bhāshya I.; तस्मात् ब्राह्मणेन न म्लेच्छितवै etc,

३०४। म्लेच्छानामपि सुवृत्तं ग्राह्यम्।

३०५। गुणे न मत्सरः कर्त्तव्यः।

३०६। शत्रोरपि सुगुणो ग्राह्यः।

३०७। विषादप्यमृतं ग्राह्यम्।

३०८। अवस्थया पुरुषः संमान्यते।

३०९। स्थान एव नराः पूज्यन्ते।

३१०। आर्य्यवृत्तमनुतिष्ठेत्।

304. But the good qualities even of Mlechchhas are to be adopted (appreciated.)

305. There should be no jealousy in appreciating the virtues of others.

306. Even the virtue of an enemy is to be accepted (appreciated).

307. [Even] Nectar is to be extracted from poison. C. P. Manu II. 269 विषादप्यमृतं ग्राह्यम्।

308. Men are honoured according to their position. Cf. अवस्था पूज्यते राजन् न शरीरं शरीरिणः etc.

309. Men in their right (high) position are honoured.

310. Always follow the conduct of the virtuous (ārya).

३११। कदाऽपि मर्य्यादां नातिक्रमेत् ।

३१२। नास्त्यर्घः पुरुषरत्नस्य ।

३१३। न स्त्रीरत्नसमं रत्नम् ।

३१४। सुदुर्लभं रत्नम् ।

३१५। अयशो भयं भयेषु ।

३१६। नास्त्यलसस्य शास्त्राधिगमः ।

३१७। न स्त्रैणस्य स्वर्गाप्तिर्धर्मकृत्यं च ।

३१८। स्त्रियोऽपि स्त्रैणमवमन्यन्ते ।

311. Never go beyond the proper limits.

312. Nothing can estimate the price of a man of quality (lit a gem among men). C. P. N. 183.

313. A good wife is a priceless gem. C.P.N. 184.

314. Gems are but rare.

315. Infamy is the worst of fears.

316. The idle have no chance of attaining knowledge of the śāstras. C. P. N. 185.

317. The uxorious neither attain heaven nor are they entitled to religious merit. C. P. N. 186.

318. They are hated even by women themselves (their wives).

३१९ । न पुष्पार्थी सिञ्चति शुष्कतरुम् ।

३२० । अद्रव्यप्रयत्नो वालुकाक्वाथनादनन्यः ।

३२१ । न महाजनहासः कर्त्तव्यः ।

३२२ । कार्य्यसम्पदं निमित्तानि सूचयन्ति ।

३२३ । नक्षत्रादपि निमित्तानि विशेषयन्ति ।

३२४ । न त्वरितस्य नक्षत्रपरीक्षा ।

३२५ । परिचये दोषा न छाद्यन्ते ।

३२६ । स्वयमशुद्धः परानाशङ्कते ।

319. One in quest of flowers does not water a withered tree C. P. N. 187.

320. Striving after the unsubstantial or the shadowy is but an attempt to extract the decoction of sand. Cf. C. P. N. 140.

321. Do not scoff at the mass or at the great. Cf. Chā. Ra. Ni. V. 8.

322. Omens presage the measure of success.

323. Omens can be read even from the [position of] stars.

324 One in a hurry hardly finds time to consult his stars. C. P. N. 190.

325. Acquaintance does not help in hiding faults.

326. A guilty mind suspects others.

३२७। स्वभावो दुरतिक्रमः ।

३२८। अपराधानुरूपो दण्डः ।

३२९। कथानुरूपं प्रतिवचनम् ।

३३०। विभवानुरूपमाभरणम् ।

३३१। कुलानुरूपं वृत्तम् ।

३३२। कार्य्यानुरूपः प्रयत्नः ।

३३३। पात्रानुरूपं दानं ।

327. Nature is insurmountable. Cf. Hitop. स्वभावो मूर्ध्नि वर्त्तते Also Ch. यः स्वभावो हि यस्य स्यात् तस्यासौ दुरतिक्रमः ।

328. Punishment must bear proportion to the offence.

329. [Only] the proper answer should be given to a question. C. P. N. 191.

330. Ornaments must be fitting to ones state (means). C. P. N. 192.

331. Conduct should follow the family (tradition).

332. The effort must be equal to the undertaking. C. P. N. 194.

333. Gifts should be proportional to the receipients (worthy persons).

३३४। वयोऽनुरूपो वेशः ।

३३५। स्वाम्यनुकूलो भृत्यः ।

३३६। भर्त्तृवशवर्त्तिनी भार्य्या ।

३३७। गुरुवशानुवर्त्ती शिष्यः ।

३३८। पितृवशानुवर्त्ती पुत्रः ।

३३९। अत्युपचारः शङ्कितव्यः ।

३४०। स्वामिनि कुपिते स्वामिनमेवानुवर्त्तेत ।

334. A man's dress must be befitting to his age (*i.e.*, of the wearer).

335. The servant must follow the master.

336. The wife must follow her husband. C. P. N. 196.

337. The disciple must follow the preceptor. C. P. N. 197.

338. A son must obey his father.

339. Too much adoration is to be dreaded or viewed with suspicion. Upachāra means, courtesy, obeisance, homage.

340. Even if the master is angry he must be obeyed.

३४१। मातृताड़ितो वत्सो मातरमेवानुरोदिति।

३४२। स्नेहवतः स्वल्पो हि रोषः।

३४३। आत्मच्छिद्रं न पश्यति परच्छिद्रमेव पश्यति बालिशः।

३४४। सोपचारः कैतवः।

३४५। काम्यैर्विशेषैरुपचरणमुपचारः।

३४६। चिरपरिचितानामत्युपचारः शङ्कितव्यः।

341. For even when repelled, the lowing calf follows the mother.

342. The affectionate have but little anger.

343. Fools see others' faults only, and not their own. C. P. N. 199. Cf. खलः सर्षपमात्राणि परच्छिद्राणि पश्यति। आत्मनो विल्वमात्राणि पश्यन्नपि न पश्यति॥

344. Rogues put on too much of an outward homage.

345 Upachāra consists in readiness to satisfy a man's whims by supplying him with the things he likes.

346. Too much of Upachāra when coming from those too wellknown is to be feared.

३४७ । गौर्दुष्करा श्वसहस्रादेकाकिनी श्रेयसी ।

३४८ । श्वो मयूरादद्य कपोतो वरः ।

३४९ । अतिसङ्गो दोषमुत्पादयति ।

३५० । सर्वं जयत्यक्रोधः ।

३५१ । यद्यपकारिणि कोपः कोपे कोप एव कर्त्तव्यः ।

३५२ । मतिमत्सु मूर्खमित्रगुरुवल्लभेषु विवादो न कर्त्तव्यः ।

347. A vicious cow is better than a thousand dogs.

348. A pigeon to-day is better than [the promise of] a peacock tomorrow. The expression is proverbial and is found in many places. Cf. Vāt. kāma, sū. वरमद्य कपोतः श्वो मयूरात्

349. Too much of intimacy (or attachment) engenders many faults.

350. The man without anger conquers all. C. P. N. 203.

351. If the injury of wrong-doers is to be punished check thy anger which is the greatest enemy.

352. Never quarrel with wise men, a fool, a friend, a preceptor or a patron. [Vallabha may

३५३। नास्त्यपिशाचमैश्वर्यम् ।

३५४। नास्ति धनवतां सुकर्मसु श्रमः ।

३५५। नास्ति गतिश्रमो यानवताम् ।

३५६। अलोहमयं निगडं कलत्रम् ।

३५७। यो यस्मिन् कुशलः स तस्मिन् योक्तव्यः ।

३५८। दुष्कलत्रं मनस्विनां शरीरकर्शनम् ।

३५९। अप्रमत्तो दारान् निरीक्षेत ।

mean, a man in superior position, a royal favourite, etc.]

353. There can be no riches without baser qualities.

354. The rich are hardly tired in the cause of doing good.

355. One possessing a carriage hardly feels the fatigue of the journey.

356. Women are but fetters though not of iron.

357. Experts are to be employed in proper spheres.

358. A bad wife saps the bodily vigour even of the wise. Cf. Chā Ra Ni. I 38—40

359. Always look upon your wife without being wanton or lascivious. Cf. Manu IV 42—44.

२६० । स्त्रीषु किञ्चिदपि न विश्वसेत् ।

३६१ । न समाधिः स्त्रीषु लोकज्ञता च ।

३६२ । गुरूणां माता गरीयसी ।

६६३ । सर्व्वावस्थासु माता भर्त्तव्या ।

३६४ । वैरूप्यमलङ्कारेणाच्छाद्यते ।

३६५ । स्त्रीणां भूषण लज्जा ।

२६६ । विप्राणां भूषणं वेदः ।

360. Never confide anything to women (put not your trust in women).

361. In women there is neither steadiness nor knowledge of human character.

362. Mother is the highest of all who are o be adored. Cf. Manu II. 145. C. P. N. 206.

863. She is to be maintained and protected talways (in all circumstances). C. P. N. 207.

364 Ornaments hide ugliness. C.P.N. 208.

365. Bashfulness is the highest of feminine virtues. Cf. Chā. Rā. Nī. VII 23; Cf. also लज्जा रूपं कुलस्त्रियः। C. P. N. 209.

366. The Vedas (*i.e.*, the knowledge of them) are the real ornaments of Brāhmanas. C. P. N. 210.

३६७। सर्व्वेषां भूषणं धर्म्मः ।

३६८। भूषणानां भूषणं सविनया विद्या ।

३६९। अनुपद्रवं देशमावसेत् ।

३७०। साधुजनबहुलो देशः ।

३७१। राज्ञो भेतव्यं सार्व्वकालम् ।

३७२। न राज्ञः परं दैवतम् ।

३७३। सुदूरमपि दहति राजवह्निः ।

367. Dharma (Righteousness) is the ornament of all. Cf. Chā. Ra. 23 & 24. C.P.N. 211.

368. Learning [knowledge of the Sciences and Arts,] attended with humility, (with moral discipline) is the best of all ornaments. C. P. N. 212.

369. A man should live in a country free from danger. C. P. N. 213.

370. [Such] A country is one inhabited by the virtuous. C. P. N. 214.

371. Always fear the king.

372. There is none higher in authority than the king (the king is the highest of all Gods).

373. The fire of royal anger consumes every thing far and near. Cf. Manu vii. 9.

३७४। रिक्तहस्तो न राजानमभिगच्छेत्।

३७५। गुरुञ्च देवञ्च।

३७६। कुटुम्बिनो भेतव्यम्।

३७७। गन्तव्यञ्च सदा राजकुलम्।

३७८। राजपुरुषैः सम्बन्धं कुर्य्यात्।

३७९। राजदासी न सेवितव्या।

३८०। न चक्षुषाऽपि राजानं निरीक्षेत।

३८१। पुत्रे गुणवति कुटुम्बिनः स्वर्गः।

374. Never approach a king with empty hands. C. P. N. 215. Cf. रिक्तहस्तो न पश्येत्तु राजानं देवतां गुरुम्

375. Nor Gods nor preceptors.

376. Beware of your own kinsmen.

377. Always attend the royal court.

378. Establish good relations with royal officials.

379. The king's slave-girls are not to be courted. C. P. N. 217.

380. Never look at a king with the ordinary eye (*i.e.*, without respect—or without proper reverence).

38 . The accomplishments of a [virtuous] s on enable the members of the family to gain

३८२। पुत्रा विद्यानां पारं गमयितव्याः।

३८३। जनपदार्थं ग्रामं त्यजेत्।

३८४। ग्रामार्थं कुटुम्बस्त्यज्यते।

३८५। अतिलाभः पुत्रलाभः।

३८६। दुर्गतेः पितरौ रक्षति स पुत्रः।

३८७। कुलं प्रख्यापयति पुत्रः।

३८८। नानपत्यस्य स्वर्गः।

heaven. Cf. Vaśiṣṭha. Dh. su. अनन्ताः पुत्रिण लोकाः etc.

382. Sons are to be trained up in (should be given) the highest training.

383. One should leave the village in the interest of the country. The idea is found in many places; see Pancha-tantra also Mahā-Udy. XXXVII. 17.

384. In the interest of the village one should give up his own kin.

385. The birth of a son is the highest of gains.

386. He who saves his parents in distress is a true son.

387. The true son brightens the family.

388. The childless have no place in heaven.

३८९ । या प्रसूते (सा) भार्य्या ।

३९० । तीर्थसमवाये पुत्रवतीमनुगच्छेत् ।

३९१ । सतीर्थाभिगमनाद् ब्रह्मचर्य्यं नश्यति ।

३९२ । न परक्षेत्रे बीजं विनिक्षिपेत् ।

३९३ । पुत्रार्था हि स्त्रियः ।

३९४ । स्वदासीपरिग्रहो हि स्वदासभावः ।

Cf. Va. Dh. Śā. XVII 2. Also Ait. Br. VII. 13. नापुत्रस्य लोकोऽस्तीति श्रूयते

389. The mother of (good) children is the true wife. Cf. Mahā-Adi. LXXIV. 40 सा भार्य्या या प्रजावती

390. When there are many wives live (after purification) with the mother of children. (cp. Ar. Śā, Bk. III. ch. 2 तीर्थसमवाये...जीवत्पुत्र गच्छेत् ।

391. Enjoyment of a wife (women) in catamenial flow destroys Brahmacharyya.

392. Never procreate children in others' wives. Cf. Manu IX. 42 & 43.

393. Women are created for children.—cf. Nārada & Manu IX अपत्यार्थं स्त्रियः सृष्टाः etc.

394. The espousal of one's own slave-girl leads but to his own enslavement.

३९५ । उपस्थितविनाशः पथ्यवाक्यं न शृणोति ।

३९६ । नास्ति देहिनां सुखदुःखाभावः ।

३९७ । मातरमिव वत्साः सुखदुःखानि कर्त्तारमेवानुगच्छन्ति ।

३९८ । तिलमात्रमप्युपकारं शैलमात्रं मन्यते साधुः ।

३९९ । उपकारोऽनार्य्येष्वकर्त्तव्यः ।

395. Impending destruction makes (ill-fated nen) men listen to no advice. Cf. Hitop. प्रायः समापन्नविपत्तिकाले धियोऽपि पुंसां मलिनीभवन्ति

396. In the animal world there is no want of pleasure or pain.

397. As a calf follows the cow so pleasure and pain [arising out of action] follow the doer. Cf. Mahā-śānti CLXXXI 16 यथा धेनुसहस्रेषु वत्सो विन्दति मातरम् । तथा पूर्वकृतं कर्म्म कर्त्तारमनुगच्छति ॥

398. In the estimate of the virtuous an atom of benefit (the slightest benefit) appears to be a great good. (Lit. a mountain of good). C. P. N. 219.

399. Never do good to the wicked (lit. anārya—devoid of moral qualities). C. P. N. 220.

४००। प्रत्युपकारभयादनार्य्यः शत्रुर्भवति ।

४०१ । स्वल्पमप्युपकारकृते प्रत्युपकारं कर्त्तुमार्य्यो न स्वपिति ।

४०२ । न कदाऽपि देवताऽवमन्तव्या ।

४०३ । न चक्षुषः समं ज्योतिरस्ति ।

४०४ । चक्षुर्हि शरीरिणां नेता ।

४०५ । अपचक्षुषः किं शरीरेण ।

४०६ । नाप्सु मूत्रं कुर्य्यात् ।

400. [Since] They become enemies for fear of repaying the good.

401. The virtuous are ever wakeful [never lose the opportunity] to do good to the benefactor. C. P. N. 221.

402. Gods are never to be insulted.

403. Eyes are the best [guiding] lights.

404. Eyes are the true guides of men. Cf. Ait. Br.

405. The blind need no [hardly require] existence. C. P. N. 222.

406. Do not pass urine in water. Cf. Manu IV 45-46 and 56. C. P. N. 223.

४०७। न नग्नो जलं प्रविशेत्।

४०८। यथा शरीरं तथा ज्ञानम्।

४०९। यथा बुद्धिस्तथा विभवः।

४१०। अग्नावग्निं न निक्षिपेत्।

४११। तपस्विनः पूजनीयाः।

४१२। परदारान् न गच्छेत्।

४१३। अन्नदानं भ्रूणहत्यामपि मार्ष्टि।

४१४। न वेदबाह्यो धर्मः।

४१५। कदा (कथं ?)चिदपि धर्मं निषेवेत।

407. Never dive into water naked. Cf. Manu IV 45.

408. Appearance is an index to wisdom.

409. Wealth depends upon intelligence.

410. Do not throw fire into fire.

411. Asectics are to be adored.

412. Never commit adultery with others' wives

413. Gift of food to others saves a man even from the most heinous sins(the word Bhruṇahatyā—means the sin of destroying a human fœtus).

414. That which is against the Vedas is not [true] religion.

415. Try to do at least some good (work of

४१६ । स्वर्गं नयति सूनृतम् ।

४१७ । नास्ति सत्यात् परं तपः ।

४१८ । सत्यं स्वर्गस्य साधनम् ।

४१९ । सत्येन धार्य्यते लोकः ।

४२० । सत्याद्देवो वर्षति ।

religious merit) Here the text seems to be corrupt. A better rending should be कथञ्चिदपि in place of कदाचित्

416. Truth leads to heaven. Cf. Mahā-udy. XXXIII 51.

417. Truth is the highest penance. C. P. N. 228.

418. Truth is the door (leads) to heaven.

419. The world is upheld by truth.

420. It is only owing to truth that the Gods shower rain on to this earth. [These ideas about truth upholding the universe, and being the highest virtue, are common in Indian literature. Similar ideas are found throughout the vedic and epic literature.

As to Vedic literature see A. V. XII 1. 1; also XIV 1. 1 सत्येनोत्तभिता भूमिः

See especially Mahā-Udyoga—XXXIV—39

४२१ । नानृतात् पातकं परम् ।

४२२ । न मीमांस्या गुरवः ।

४२३ । खलत्वं नोपेयात् ।

४२४ । नास्ति खलस्य मित्रं ।

४२५ । लोकयात्रा दरिद्रं बाधते ।

४२६ । अतिशूरो दानशूरः ।

४२७ । गुरुदेवब्राह्मणेषु भक्तिर्भूषणम् ।

४२८ । सर्व्वस्य भूषणं विनयः ।

Śānti — CXXV — 28 ; Śānti — CCCXLII — 18 Anu—LXXV—28 ; Āsva—XXX — 32.]

421. Untruth is the worst sin. C. P. N. 229.

422 The commands of preceptors are never to be doubted or disputed.

423. Avoid mischief-making.

424. A mischief-maker has no friend. C. P. N. 230.

425. Only the poor suffer in this world.

426. He who excels in charity is the best hero. C. P. N. 231.

427. Reverence to Gods, sages and Brahmaṇas embellishes a man. C. P. N. 232.

428. Moral discipline is the ornament of all.

४२९। अकुलीनोऽपि विनीतः कुलीनाद्विशिष्टः ।

४३०। आचारादायुर्वर्द्धते कीर्त्तिश्च ।

४३१। प्रियमप्यहितं न वक्तव्यम् ।

४३२। बहुजनविरुद्धमेकं नानुवर्त्तेत ।

४३३। न दुर्ज्जनेषु भागधेयः कर्त्तव्यः ।

४३४। न कृतार्थेषु नीचेषु सम्बन्धः ।

४३५। ऋणशत्रुव्याधिष्वशेषः कर्त्तव्यः ।

429. It (discipline) makes a man appear better than one of a noble family. C. P. N, 233.

430. The following of right conduct increases life and fame. Cf. Manu IV. 156. C.P N. 234.

431. Evil [counsel] though acceptable should not be given.

432. Never follow a man opposed by many.

433. The wicked are never to be associated with, in any undertaking.

434 Alliance with the base though they are successful is to be avoided.

435. Never tolerate the remnants of debts of enemies and of diseases. Cf. Val. Su. 2760 also ऋणशेषोऽग्निशेषश्च. etc. C. P. N. 235.

४३६। भृत्याऽनुवर्त्तनं पुरुषस्य रसायनम्।

४३७। नार्थिष्ववज्ञा कार्य्या।

४३८। दुष्करं कर्म्म कारयित्वा कर्त्तारमवमन्यते नीचः

४३९। नाकृतज्ञस्य नरकान्निवर्त्तनम्।

४४०। जिह्वायत्तौ वृद्धिविनाशौ।

४४१। विषामृतयोराकरी जिह्वा।

४४२। प्रियवादिनो न शत्रुः।

436. Striving after prosperity adds to the energy and vigour of men.*

437. Never insult those who come to seek for favour.

438. It is only the base who insult their agent after they have finished their work.

439. The ungrateful never return from hell. C. P. N. 236.

440. A man's prosperity or destruction depends upon his tongue (speech).

441. The tongue is a mine of poison and nectar.

442. A man who speaks mildly has no enemy. C. P. N. 237. Cf. कः परः प्रियवादिनाम्?

---

* Rasāyana is defined thus :—

यज्जराव्याधिविध्वंसि भेषजं तद्रसायनम्।

४४३ । स्तुता अपि देवता स्तुष्यन्ति ।

४४४ । अनृतमपि दुर्व्वचनं चिरं तिष्ठति ।

४४५ । राजद्विष्टं न च वक्तव्यम् ।

४४६ । श्रुतिसुखात् कोकिलालापात्तुष्यन्ति ।

४४७ । स्वधर्म्महेतुः सत्पुरुषः ।

४४८ । नास्त्यर्थिनो गौरवम् ।

४४९ । स्त्रीणां भूषणं सौभाग्यम् ।

४५० । शत्रोरपि न पातनीया वृत्तिः ।

443. Prayer makes even Gods relent.

444. Hard words though not true live for ever (are always remembered). Cf. Sup.

445. Never speak ill of the king.

446. The sweet voice of the cuckoo pleases all.

447. The virtuous excel in righteousness of conduct.

448. The seeker of favour has no position (in the eyes of others).

449. Good fortune is the highest ornament of women.

450. Even an enemy should not be deprived of his means or livelihood.

४५१। अप्रयत्नादेकं चेत्रम्।

५५२। एरण्डमवलम्ब्य कुञ्जरं न कोपयेत्।

४५३। अतिप्रवृद्धा शाल्मली वारणस्तम्भो न भवति।

४५४। अतिदीर्घोऽपि कर्णिकारो न मुसली।

४५५। अतिदीप्तोऽपि खद्योतो न पावकः।

४५६। न प्रवृद्धत्वं गुणहेतुः।

४५७। सुजीर्णोऽपि पिचुमन्दो न शङ्कुलायते।

४५८। यथा बीजं तथा निष्पत्तिः।

451. Want of labour (agricultural toil) reduces all fields (good or bad) to the same state.

452. Never provoke an elephant while your sole protection is the Eranda. (Castor plant.)

453. An old S'ālmalī tree cannot furnish a pillar for binding elephants.

454. However big the Karṇikāra cannot make clubs.

455. However bright the glowworm is not fire.

456. Age is not the [true] index to wisdom. Cf. Manu II. 156 न तेन वृद्धो भवति etc.

457. A branch of the Pichumanda, though well grown never serves the purpose of a stake.

458. The fruit depends upon the seed.

४५९ । यथा श्रुतं तथा बुद्धिः ।

४६० । यथा कुलं तथाचारः ।

४६१ । संस्कृतः पिचुमन्दो न सहकारो भवति ।

४६२ । न चागतं सुखं त्यजेत् ।

४६३ । स्वयमेव दुःखमधिगच्छति ।

४६४ । रात्रिचारणं न कुर्य्यात् ।

४६५ । न चार्द्धरात्रं स्वपेत् ।

४६६ । तद्विद्वद्भिः परीक्षेत ।

459. Practical intelligence depends upon learning C. P. N. 242.

460. Conduct depends upon the family (tradition).

461. The Pichumanda however cared for (improved) bears no mango. Cf. शर्कराशतभारेण निम्बवृक्ष उपार्ज्जितः। पयसा सिञ्चितो नित्यं न निम्बो मधुरायते ॥

462. Fortune at hand is not to be shunned.

463. [Since] Sorrow comes of itself.

464. Never wander about at night. C. P. N 243. Cf. Mahā-Udyoga XXXVII—28

465. Never go to bed late at night.

466. Everything should be examined by the wise.

४६७। परगृहमकारणतो न प्रविशेत् ।

४६८। ज्ञात्वाऽपि दोषमेव करोति लोकः ।

४६९। शास्त्रप्रधाना लोकवृत्तिः ।

४७०। शास्त्राभावे शिष्टाचारमनुगच्छेत् ।

४७१। नाचरिताच्छास्त्रं गरीयः ।

४७२। दूरस्थमपि चारचक्षुः पश्यति राजा ।

467. Enter not others' houses without reason.

468. Men err (commit or do wrong) inspite of knowing.

469. The conduct of men is guided by the S'āstras.

470. In the absence of injunctions of S'āstras follow the conduct of the virtuous. Cf. Va. Dh. S'ā I. I. 4. तदभावे शिष्टाः प्रमाणम् ।

471. The S'āstras are not higher than the right line of conduct.

472. Kings see through their spies though living at a distance. Cf Kāmandaka Nīti XIII 27-33; Mahā-Udy. XXXIV—34 also Nīti-Vākyāmrita; also Māgha II. 82. यस्मात् पश्यन्ति दूरस्थाः सर्वानर्थान्नराधिपाः । चारेण तस्मात् कथ्यन्ते राजानश्चारचक्षुषः Rā. III 33-10

४७३। गतानुगतिको लोकः।

४७४। यमनुजीवेत् तं नापवदेत्।

४७५। तपःसार इन्द्रियनिग्रहः।

४७६। दुर्लभः स्त्रीबन्धनान्मोक्षः।

४७७। स्त्री नाम सर्वाशुभानां क्षेत्रम्।

४७८। न च स्त्रीणां पुरुषपरीक्षा।

४७९। स्त्रीणां मनः क्षणिकम्।

473. The world is guided by traditional methods. Cf. Hitop. गतानुगतिको लोकः etc.

474. Slander not your protector whom you serve.

475. Control over the senses is the essence of penance.

476. It is difficult to be free from the allurements of women.

477. Women are but sources,(*e g*, fields which produce evil) of evil Cf. Mahā. Anu. XXXVIII 1 & 12 स्त्रियो हि मूलं दोषाणां etc.

478. They never examine (the good and bad sides of) human character.

479. The female mind is fickle. Cf. Anu.

४८० । अशुभद्वेषिणः स्त्रीषु न प्रसक्ताः (क्तिः) ।

४८१ । यज्ञफलज्ञास्त्रिवेदविदः ।

४८२ । स्वर्गस्थानं न शाश्वतं यावत् पुण्यफलम् ।

४८३ । न च स्वर्ग-पतनात् परं दुःखम् ।

XXXVII—लघुचित्ता हि ताः etc. also, 10—24 चलस्वभावाः etc.

480. Haters of evil are not enamoured of women.

Such denunciations of the female character are common throughout the whole of ancient literatures not only of India, but of Egypt, Greece, of the Hebrews and of the Saracens. For similar ideas see the Jātakas ; Mahā—Anu Chap. 19, 20, 38-40, 42, 43. Chā,—Rā. Nī —I (47—51) Manu IX etc. On the other hand chaste women are highly praised and the highest eulogy is bestowed on them.

481. Men learned in the three Vedas know the essence of sacrifice. Cf. अग्निहोत्रफलावेदाः etc.

482. Life in heaven is not eternal but lasts as long as the fruits of virtue last. Cf. Bhagavadgita IX. 21. ते तं भुक्त्वा स्वर्गलोकं विशालं क्षीणे पुण्ये मर्त्यलोकं विशन्ति etc.

483. A fall from heaven is the worst catastrophe.

४८४। देही देहं त्यक्त्वा ऐन्द्रपदं न वाञ्छति।

४८५। दुःखानामौषधं निर्वाणम्।

४८६। अनार्य्यसम्बन्धाद्वरमार्य्यशत्रुता।

४८७। निहन्ति दुर्वचनं कुलम्।

४८८। न पुत्रसंस्पर्शात् परं सुखम्।

४८९। विवादे धर्म्ममनुस्मरेत्।

४९०। निशान्ते कार्य्यं चिन्तयेत्।

484. Men prefer life to the highest place, (*i.e*, the position of Indra the King of Gods) in heaven (after death).

485 The only antidote to sorrow is its removal. Nirvāna in its Buddhist sense means total annihilation of self.

486. The enmity of the virtuous is better than the friendship of the base. C. P. N. 244. Cf. Kriata I. 8.

487. Hard words destroy families.

488. A son's contact is the highest bliss.

489. During quarrels try to remember (the right line of conduct, (Dharma).

490 Deliberate upon your actions (daily duties) at break of day. C. P. N. 245.

४९१ । प्रदोषे न संयोगः कर्त्तव्यः ।

४९२ । उपस्थित-विनाशः दुर्नयं मन्यते ।

४९३ । क्षीरार्थिनः किं करिण्या ।

४९४ । न दानसमं वश्यम् ।

४९५ । परायत्तेषूत्कण्ठां न कुर्य्यात् ।

४९६ । असत्समृद्धिरसद्भिरेव भुज्यते ।

४९७ । निम्बफलं काकैर्भुज्यते ।

४९८ । नाम्भोधिस्तृष्णामपोहति ।

491. Never engage in work at night-fall.

492. A man whose destruction is imminent resorts to a bad line of conduct.

493. He who wants milk has nothing to do with the she-elephant.

494. Gifts win over all.

495. Never be eager to enjoy things in others' control.

496. The prosperity of the wicked is for the enjoyment of the base.

497. [Just as] The crow only eats the fruit of Nimba.

498. The water of the sea (which is salt) does not quench anybody's thirst.

४९९ । वालुका अपि स्वगुणमाश्रयन्ते ।

५०० । सन्तोऽसत्सु न रमन्ते ।

५०१ । हंसः प्रेतवने न रमते ।

५०२ । अर्थार्थं प्रवर्त्तते लोकः ।

५०३ । आशया बध्यते लोकः ।

५०४ । न चाशापरैः श्रीः सह तिष्ठति ।

५०५ । आशापरे न धैर्य्यम् ।

५०६ । दैन्यान्मरणमुत्तमम् ।

499. Sand-particles ever retain their nature.

500. The good are not enamoured of evil.

501. The swan does not live (sport) in the wilderness.

502. Men are actuated by their self-interest. (desire for earthly gain) Artha here means the object which moves a man.

503. Men are bound by hopes.

504. The goddess of Fortune does not smile on those who have too much hankering.

505. Hankering destroys composure.

506. Death is better than poverty. Cp. Mrich. Ka. Act I दारिद्र्याद् मरणाद्वा etc.

५०७। आशा लज्जां व्यपोहति।

५०८। न मात्रा सह वासः कर्त्तव्यः।

५०९। आत्मा न स्तोतव्यः।

५१०। न दिवा स्वप्नं कुर्य्यात्।

५११। न चासन्नमपि पश्यत्यैश्वर्य्यान्धः न शृणोतीष्टं वाक्यम्।

५१२। स्त्रीणां न भर्त्तुः परदैवतम्।

५१३। तदनुवर्त्तनमुभयसौख्यम्।

507. Hankering dispels modesty.

508. Close residence (companionship) even with one's own mother is to be avoided. Cf. मात्रा स्वस्रा दुहित्रा etc. Manu II—215

509. One should not indulge in selfpraise. C. P. N. 247.

510. Never sleep at day time. Cf. Manu III Gobhila, Gri. Su. II. 10. 34. C. P. N. 248.

511. The blindness caused by good fortune prevents a man from seeing things near at hand or listening to good advice. Cf. Kādamvari.

512. (In the case) Of women none is higher than the husband. Cf. Manu V. 155 also Mahābhārata—in many places.

513. Obedience to him brings joy to her in

५१४ । अतिथिमभ्यागतं पूजयेत् यथाविधि ।

५१५ । नास्ति हव्यस्य व्याघातः ।

५१६ । शत्रुर्मित्रवत् प्रतिभाति ।

५१७ । मृगतृष्णा जलवद्भाति ।

५१८ । दुर्मेधसामसच्छास्त्रं मोहयति ।

५१९ । सत्सङ्गः स्वर्गवासः ।

५२० । आर्यः स्वमिव परं मन्यते ।

this life and in that beyond. Cf. Manu V. 155, 166, etc.

514. Guests are to be duly worshipped.

515. [The should be] no shortcoming in the way of proper adoration [any thing may be given for satisfying him.]

516. Enemies often appear as friends.

517. The mirage appears like a sheet of water.

518. Fools are [often] lured by false teachings.

519. Living in good company is but dwelling in heaven.

520. The virtuous regard others as their own selves.

५२१। रूपानुवर्त्ती गुणः।

५२२। यत्र सुखेन वर्त्तते तदेव स्थानम्।

५२३। विश्वासघातिनो न निष्कृतिः।

५२४। दैवायत्तं न शोचेत्।

५२५। आश्रितदुःखमात्मन इव मन्यते साधुः।

५२६। हृद्गतमाच्छाद्यान्यद्वदत्यनार्य्यः।

३२७। बुद्धिहीनः पिशाचतुल्यः।

521. Quality follows appearance. C P.N. 250. Cf. यत्राकृतिस्तत्रगुणा वसन्ति.

522. The proper place is one where there is happiness.

523. The traitor has no salvation (or safety.)

524. . (The adversities of fate) That which is controlled by Daiva or supernatural is not to be lamented.

525. The good regard the troubles of their dependants as their own.

526. The wicked conceal their mind and speak other words. Cf. Hitop. मनस्यन्यद् वचस्यन्यत् कर्म्मण्य-न्यद् दुरात्मनाम् etc.

527. One devoid of intelligence is like a devil.

५२८। असहायः पथि न गच्छेत्।

५२९। पुत्रो न स्तोतव्यः।

५३०। स्वामी स्तोतव्योऽनुजीविभिः।

५३१। धर्म्मकृत्येष्वपि स्वामिन एव घोषयेत्।

५३२। राजाज्ञां नातिलङ्घयेत्।

५३३। यथाज्ञप्तं तथा कुर्य्यात्।

५३४। नास्ति बुद्धिमतां शत्रुः।

५३५। आत्मच्छिद्रं न प्रकाशयेत्।

528. Never go about without any help.

529. The son is not to be praised [in his presence ?]

530. The master should be praised by his servants.

531. Servants should proclaim the good deeds of their master when undertaking any pious deed.

532. Never transgress the royal command.

533. Do as commanded by him.

534. The intelligent have no enemy.

535. One should not divulge his own weak points.

५३६ । क्षमावानेव सर्वं साधयति ।

५३७ । आपदर्थं धनं रक्षेत् ।

५३८ । साहसवतां प्रियं कर्त्तव्यम् ।

५३९ । श्वः कार्य्यमद्य कुर्वीत ।

५४० । आपराह्णिकं पूर्वाह्ण एव कर्त्तव्यम् ।

५४१ । व्यवहारानुलोमो धर्म्मः ।

536. He who is ready to forgive succeeds everywhere.

537. Lay by your money for times of distress. Cf. the well-known Chā. sloka आपदर्थं धनं रक्षेत् etc Mahā Udy.—XXXIV.

538. The brave are to be won over.

539. To-morrow's work must be finished to-day. C P.N 256. Cf. Mahā. S'ānti CCLXXVI. 13. श्वः कार्य्यमद्य कुर्व्वीत पूर्व्वाह्णे चापराह्णिकम् etc.

540. That which is to be done by afternoon should be finished in the morning.

541. Religion (right line of conduct) follows custom. व्यवहार is used in various senses; here—usage, custom, conduct.

6

५४२ । सर्वज्ञता लोकज्ञता ।

५४३ । शास्त्रज्ञोऽप्यलोकज्ञो मूर्खतुल्यः ।

५४४ । शास्त्रप्रयोजनं तत्त्वदर्शनम् ।

५४५ । तत्त्वज्ञानं कार्य्यमेव प्रकाशयति ।

५४६ । व्यवहारे पक्षपातो न कार्य्यः ।

५४७ । धर्म्मादपि व्यवहारो गरीयान् ।

५४८ । आत्मा हि व्यवहारस्य साक्षी ।

542. The knowledge of men is the highest knowledge.

543. A learned man without the knowledge of the world makes but a fool.

544. The end of learning is to attain the highest wisdom (self knowledge .

545. The higher wisdom is reflected in action.

546. There should be no partiality in a judicial trial.

547. Justice is higher than religion.

548. The soul is the [highest] witness of every thing Cf. Manu VIII. 84 आत्मैव ह्यात्मनः साक्षी गतिरात्मा तथात्मनः । नावमंस्थाः स्वमात्मानं नृणां साक्षिण मुत्तमम् ॥

५४९। सर्वसाक्षी ह्यात्मा।

५५०। न स्यात् कूटसाक्षी।

५५१। कूटसाक्षिणो नरके पतन्ति।

५५२। प्रच्छन्नपापानां साक्षिणो महाभूतानि।

५५३। आत्मनः पापमात्मैव प्रकाशयति।

५५४। व्यवहारोऽन्तर्गताकारः सूचयति।

५५५। आकारसंवरणं देवानामशक्यम्।

५५६। चोरराजपुरुषेभ्यो वित्तं रक्षेत्।

549. One's self is the witness of own's own conduct.

550. Never bear false witness. C. P. N. 258.

551. False witnesses go to hell. Cf. Manu VIII. 90 to 96.

552. The great elements are the twiness of sins committed in private. Cf. Manu VIII. 86.

553. The self discloses all sins of its own.

554. The inner self indicates itself during a judicial trial.

555. Even Gods cannot hide true appearance. C. P. N. 261.

556. Wealth is to be preserved from thieves and royal officers.

५५७। दुर्दर्शना हि राजानः प्रजा नाशयन्ति।

५५८। सुदर्शना हि राजानः प्रजा रञ्जयन्ति।

५५९। न्याययुक्तं राजानं मातरं मन्यन्ते प्रजाः।

५६०। तादृशः स राजा इह सुखं ततः स्वर्गमाप्नोति।

५६१। अहिंसालक्षणो धर्म्मः।

557. A king difficult of approach or access to his subjects brings ruin on them. Cf. Kauṭilya. Ar. S'ā. Bk. I. Ch. 19. दुर्दर्शो हि राजा कार्य्याकार्य्यविपर्य्यासम् आसन्नैः कार्य्यते। तेन प्रकृतिकोप मरिवशं वा गच्छेत्

558. A king easy of access delights his people.

559. A righteous king is regarded as the mother of his subjects. Cf. Mahā śānti. CXXXIX 103, माता पिता गुरुर्गोप्ता etc. also Cha. Ra. N. V. 58.

560. Such a king is happy in this world and attains heaven after death.

561. Ahimsā is the essence of Dharma, or true religion. Cf. C. P. N. 157. Cf. the teachings of the Anuśāsana and S'āntiparva, Mahā.

५६२ । स्वशरीरमपि (इव) परशरीरं मन्यते साधुः ।

५६३ । मांसभक्षणमयुक्तं सर्वेषाम् ।

५६४ । न संसारभयं ज्ञानवताम् ।

५६५ । विज्ञानदीपेन संसारभयं निवर्त्तते ।

५६६ । सर्वमनित्यं भवति ।

५६७ । कृमिशकृन्मूत्रभाजनं शरीरं पुण्यपापजन्महेतुः ।

५६८ । जन्ममरणादिषु दुःखमेव ।

५६९ । तपसा स्वर्गमाप्नोति ।

562. The pious think as much for others as for their own selves.

563. Flesh-eating is to be avoided by all.

564. The wise do not fear the world.

565. The light of true knowledge dispels all worldly fears.

566. Every thing in this world is transient.

567. This body containing worms, ordure and urine is the source of virtue and vice. Practically the same idea occurs in Manu. VI 76—77 अस्थिस्थूनं स्नायुयुतं etc. and this has also Buddhist parallels.

568. There is sorrow in birth and death.

569. Penance leads to heaven.

५७० । क्षमायुक्तस्य तपो विवर्द्धते ।

५७१ । तस्मात् सर्वेषां कार्य्यसिद्धिर्भवति ।

इति चाणक्यसूत्राणि ॥

समाप्तोऽयं ग्रन्थः ।

570. The religious merit of one who is ready to forgive is ever increased.

571. This (*i.e.* the increment of virtue) will make all succeed in their undertakings or actions.

THE END.

Printed by Upendra Nath Bhattacharyya, Hare Press, Calcutta.